स्त्वांविसृज्यप्राप्नोष्यंत्याश्रमंयद्यथस्तुतविरहात्त्वत्पितामांहनिष्येत् ॥ इत्यु
क्तःसोयमूचेयदिममजनकोहंतुकामोभ्ययात्त्वां वक्ष्येहंस्वेच्छयैवाश्रमवरम
लभंकिंबलेनेतिसोदात् ॥ ८ ॥ इत्थंसादीश्वरोक्तोरघुपतिभजनेयोग्यइत्ये
वबुद्धिं कृत्वाप्रादाद्यतित्वंगुरुवचनमसौसंस्मरन्योगिवर्यः ॥ शास्त्रंयद्व
ऋपद्मोद्गलितमशृणुयाद्योजयेत्सर्ववादीनित्थंकालत्रयज्ञोभ्यधितजयस्तुती
थैंतिसंज्ञांसतस्य ॥ ९ ॥ कालेतस्मिन्पितास्यस्वतनयमशृणोत्धंसवेषंदधा
नं कोपात्संहर्तुमिछन्यातिवरतिलकंसेनयागाच्छुचार्तः ॥ गत्वाकोपाद्य
तींद्रंतनयमनयकृद्राज्यहीनंत्वकार्षी भार्याहीनंयतींद्रेत्यवदद्सुमसौशोक
मोहादजानन् ॥ १० ॥ इत्युक्तोहंसराजोयदितवतनयेस्नेहपाशोस्तितं
द्रागेहंसंयापयेत्थंह्यवदद्सुमसौस्नेहपाशान्निनाय ॥ नीत्वापुत्रंसहर्षादथ

ज० सुरतगृहंरम्यमावेशयित्वाभार्यांतस्यादिशत्सायाति निकटमगात्कामबाणे वि०
२ नचार्ता ॥ ११ ॥ तस्मात्तत्कांतिपुंजाद्यतिवरतिलकंवीक्षितुंनाशकत्साप्रा
वोचद्बंधुवर्गंयतिवरतिलकंवीक्षितुंनास्मिशक्ता ॥ बंधूक्तःसादिभूपोय
तिवरनिकटेपुत्रमानीयनायं योग्यःसंघर्षणार्थंत्वितिनिगदितवान्हंसराजं
सभूयः ॥ १२ ॥ दृष्ट्वातातंशुचार्तंनिजजनसहितंप्रावदत्स्वेच्छयेत्थंया
न्नापूर्वंमयासंयतिवरतिलकःकिंनिमित्तंयतित्वे ॥ तस्मात्तान्प्रार्थयित्वाह
रिभजनरतःसर्वदान्यंकनिष्टं पुत्रंदृष्ट्वाशुचस्त्वंजहिसुजनरतःपुत्रवत्तान्प्र
पाहि ॥ १३ ॥ इत्याद्यैःसामवाक्यैःप्रशमितसुमनाःस्वालयंसेनयागात्धं
सोगुर्वाज्ञयागात्सकलसुजनतांपावयन्दर्शनाद्यैः ॥ दुर्वादीन्द्राग्वचो २
भिस्त्वजयदखिलभूमंडलेसंस्थितान्द्राग्विष्णोः सर्वोत्तमत्वंश्रुतिगणसहि

तैःसाधयंश्चापितर्कैः ॥ १४ ॥ एवंजित्वाकुवादीनगमदिहगुरुःश्रीमद
क्षोभ्यतीर्थप्रांतंमध्वागमांस्तुप्रतिदिनमशृणोद्भक्तिनम्रस्तदंते ॥ एवंकाले
व्यतीतेनिखिलमधिगतंस्थानमस्मैप्रदायप्रायाद्विष्णोःसमीपंसकलसुरगणै
र्मानयानःसदास्ते ॥ १५ ॥ एवंप्राप्तेगुरुत्वेहरिचरणयुगंहंसराजोविचिं
त्यप्रायाद्दुर्गालयंचप्रतिदिनमकरोद्बुद्धिमांस्तत्तपोग्र्यं ॥ दुर्गातस्मात्प्र
सन्नाप्रवददतितरांभक्तिनम्रंयतींद्रं वांछाकस्मिन्यतींद्रेत्यवददितियतिर्देहि
पूगंचकंठां ॥ १६ ॥ कंठांपूगीफलंचेत्युभयमपिततःप्राप्यमध्वागमांस्तु
व्याकुर्वन्ग्राममेकंयरगुलइतिचाख्यायुतंप्राप्यशैलं ॥ तत्प्रांतस्थोथदर्यांरघु
पतिमनिशंपूजयन्नंबुपत्रैरन्नाच्छिष्योपनीताद्यतिवरतिलको यावनाळाद्यु
वास ॥ १७ ॥ एवंतिष्ठन्गुहायांप्रकरणदशकंसाधुवाक्यैर्विविच्यभाष्य

व्याख्यांतथान्तुप्रशमितकुमतांव्याकरोच्छ्रीजयार्यः ॥ तात्पर्यंगीतिकायाः
सुविवृतमकरोत्तत्प्रशंसंचभाष्यं ऋग्भाष्यंव्याकरोद्योविवरणमथसन्न्यायस
द्विस्तृतेस्तु ॥ १८ ॥ ईशावास्यस्यभाष्यंप्रविततसुमनाः प्रश्नषट्क
स्यभाष्यं व्याचष्टेसद्वचोभिःप्रशमितकुमतिः श्रीजयार्योरराज ॥ एवं
मध्वागमानांप्रवचनमकरोच्छ्रीपतिप्रेष्टवर्यो दुर्वादीन्मायिमुख्यानजयदनु
पुरासंस्थितानग्र्यबुद्धिः ॥ १९ ॥ कीर्तिंतेषाममर्षन्प्रवचनचतुरैःशि
ष्यवत्छिष्यसंघैःसाकंनागेंद्रसंस्थोखिलनिगमततेर्भावसंदर्शनेन ॥ प्राज्ञंम
न्योतिगर्वीप्रवचनचतुरंश्रीजयार्यं विजेतुंविद्यारण्याख्यवादीसमगमदि
वसत्पंचवत्कंसृगालः ॥ २० ॥ दृष्ट्वाप्राप्तंकुवादंयतिवरातिलकोमानस
ल्लक्षणस्थंवाक्यंत्वेकंप्रदर्श्यावददितिकथयास्यार्थसत्संगतीच ॥ विद्यार

ण्यस्तथोक्तः प्रवचनचतुरःसंविचार्यानुपूर्व्यंदुःशक्यंचेतिमत्वाप्रवददतिकु
वाक्बालवाक्येनाकिंमे ॥ २१ ॥ इत्युक्तोहंसराजोप्यातिकुपिततरोबालबु
द्धिस्त्वमेवेत्युक्त्वाव्याख्यांस्वजन्यामवददतितरांसंगतिंचानयोस्तु ॥ श्रु
त्वातांलज्जितोमुंप्रवचनचतुरंस्तोत्रदंडप्रणामै नागेंद्रंचाधिरूढंद्विजगण
सहितोचारयद्वाद्यसंघैः ॥ २२ ॥ इत्याद्यैश्चित्रचर्यैर्यतिवरमसहन्सर्वदिक्षु
प्रसिद्धोवादींद्रोवादिशूरोविधृतजयपटःशीघ्रमायाद्विजेतुं ॥ संप्राप्तंतं
स्वशिष्यैर्बहुभिरमलधीरैक्यवादोनसिद्धो मानाभावादितिद्रागवददमु
मसौमान्यलोकेचमान्यः ॥ २३ ॥ इत्याक्षिप्तोभिमानीप्रवददमुमसौतत्व
तोनैवभिन्नाह्यात्मत्वादात्मनोन्येनिखिलविधुरवाक्चेतिमानंत्वभेदे ॥ इ
त्थंचोक्तोमुनासाववददतिबलंदूषणंबाधसंज्ञं सिद्धत्वात्सद्भिदायाःश्रुतिश

ण्यस्तथोक्तः प्रवचनचतुरःसंविचार्यानुपूर्व्यंदुःशक्यंचेतिमत्वाप्रवददतिक्रु
वाक्बालवाक्येनाकिंमे ॥ २१ ॥ इत्युक्तोहंसराजोप्यातिकुपिततरोबालबु
द्धिस्त्वमेवेत्युत्क्वाव्याख्यांस्वजन्यामवददतितरांसंगतिंचानयोस्तु ॥ श्रु
त्वातांलज्जितोमुंप्रवचनचतुरंस्तोत्रदंडप्रणामै नागेंद्रंचाधिरूढंद्विजगण
सहितोचारयद्वाद्यसंघैः ॥ २२ ॥ इत्याद्यैश्चित्रचर्यैर्यतिवरमसहन्सर्वदिक्षु
प्रसिद्धोवादींद्रोवादिशूरोविधृतजयपटःशीघ्रमायाद्विजेतुं ॥ संप्राप्तंतं
स्वशिष्यैर्बहुभिरमलधीरैक्यवादोनासिद्धो मानाभावादितिद्रागवददमु
मसौमान्यलोकेचमान्यः ॥ २३ ॥ इत्याक्षिप्तोभिमानीप्रवददमुमसौतत्व
तोनैवभिन्नाह्यात्मत्वादात्मनोन्येनिखिलविधुरवाक्चेतिमानंत्वभेदे ॥ इ
त्थंचोक्तोमुनासाववददतिबलंदूषणंबाधसंज्ञं सिद्धत्वात्सद्भिदायाःश्रुतिश

तवचनैर्द्वासुपर्णादिरूपैः ॥ २४ ॥ ऐक्यंब्रह्मस्थवाक्यैर्बहुभिरपिदृढंतत्वम
स्यादिरूपैरित्थंनाशंकनीयंसदृशगुणवशात्सिंहशब्दोयथाणौ ॥ एवंनां
गीकरोषिश्रुतिततिरभवच्चाप्रमाणंविरोधादन्योन्यं नैवभेदश्रुतिरपिबहुधा
सावकाशास्फुटत्वात् ॥ २५ ॥ यद्येवंबाधितार्थंश्रुतिततिरवदेच्छ्रौतवा
क्याद्विशेषात्सत्यंज्ञानेतिवाक्यंप्रकृतिपरतयाबाधितार्थंवदेत ॥ अस्त्वित्ये
वंवदेथाःप्रकृतिपरतयाप्राप्तमुक्तिर्नराध्र्यानस्याद्वै कल्पदोषाच्छ्रुतिगणविहि
तस्यार्थबाधोनचास्ति॥२६॥गीतायांदर्शितत्वात्सकलनिगमवाङ्निर्णया
र्थंप्रवृत्तेसूत्रेसंदर्शितत्वाच्छ्रुतिततिविहितोबाधितोनैवभेदः ॥ इत्थंतद्बा
धितैक्यंप्रकथयसितदादूषणैरप्यसंख्यैर्दुष्टोसित्वंनिरुत्धोविगतमुखरसोऽवा
ङ्मुखोगान्निशायां ॥ २७ ॥ कीर्तिंतत्साधितांतांबहुविजयभवांकालतो

नल्पतोसौप्राप्तः कालार्धतोयंसकलदिशिगताकीर्तिमापानवद्यां ॥ की
र्तिंतांविद्धदाढ्याःपरित्हृतविजयंवादिभूपंनिशम्यक्षुब्धाः संत्रस्तगात्राः
विसृजितशिबिकानैवचेलुःस्वदेशात् ॥ २८ ॥ स्नात्वाकालेब्जजस्यप्रण
वपरमनुंत्वन्यमंत्रांश्चजप्त्वामंत्रार्घ्यंचानुदत्वाहरिशिरसिगतं पुष्पमाला
दिमार्ष्टि ॥ सर्वेषांव्यासरूपाण्यमितपदरतिंदर्शयित्वामठंद्राग्गत्वादेवस्य
पूजां प्रशमितमनसासाधुकृत्वाननाम ॥ २९ ॥ तीर्थंसेव्यागतानांअ
पिपरममतिः पाठयित्वामनुंद्राक् तप्तेमुद्रेप्रदायप्रवचनमकरोत्छिष्यपालिं
प्रहर्षात्॥पश्चात्स्नानंविधायाममलगुणगणंपूजयित्वाद्विजेंद्रैःसाकंभुंजन्प्र
सादंपुनरपिकृतवान्स्नानपूजेनमश्च ॥ ३० ॥ पश्चात्तत्वप्रसंगंप्रवितम
नसासाधुभिः साधुकृत्वाध्यायन् विष्णोर्गुणांस्तानमलहृदयतोरात्रिशे

षंनिनाय ॥ एवंकालंनयन्सः सकलभुविगतंतीर्थजालंहिसेवन्तत्तद्राष्ट्र
स्थवादीनजयदनुदिनंजंबुकान्वाथसिंहः ॥ ३१ ॥ सर्वान्नाजित्वाकुवादी
नखिलजयपरंपत्रजालंजयस्य श्रीकांतस्यार्पयित्वास्वगुरुपरमवृंदावनंवंदि
तुंद्राक् ॥ स्नात्वाकाश्यांत्रिवेण्यामवनिसुरगणैःसंयुतस्तैर्विचार्यंप्रादात्तुर्या
श्रमंसंपरित्दृतविषयायाशुविप्रोत्तमाय ॥ ३२ ॥ कृत्वातस्याभिषेकंरघुप
तिभजनेस्वस्यसंस्थानमस्मैप्रादाद्विद्या धिराजेत्यमुममलमतिंघोषयामा
सदिक्षु ॥ युक्त्यासंशिक्षयंस्तंप्रवचनचतुरंवादिभेत्तारमग्र्यंकृत्वातंदिग्ज
यार्थंपरमगुणनिधिः प्रार्थयामासविष्णुं ॥ ३३ ॥ चित्रंश्रीमज्जयार्यैःकृ
तमतिविशदंविक्रमंकोनुवक्ता किंतुस्मृत्यर्थमल्पंगुरुभिरनुदिनंवर्णितंवर्णि
तंमे ॥ तेनश्रीमध्वनाथोयदुकुलतिलकोमाधवोमानसिस्थोभूयात्प्रीतःस

मस्ताअपिग्रुरुगुरवःप्रीतियुक्ताभवंतु ॥ ३४ ॥ इति श्रीव्यासतीर्थयतिना विरचिता जयतीर्थविजयः समाप्तः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ६ ॥

इदं पुस्तकं सामंतोपाव्ह भिकाजीसूनु हरिणा स्वकीय
(बेळगांवसमाचाराभिध) मुद्रालये अंकयित्वा
प्रकटनमकारि:—शकाब्दाः १८११.

बेळगांव समाचार छापखान्यांतील विक्रीच्या पुस्तकाची यादी.

नं	पुस्तकांचीं नांवें.	किंमत. रु.	आ.	पै.	नं.	पुस्तकांचीं नांवें	किंमत. रु.	आ.	पै.
	बालबोध लिपी कन्नड भाषा.				११	श्रीवादिराजयतिकृत जीवन्मुक्तलीला (वैकुंठपट)	०	०	६
१	हरिकथांमृतसार सटीक.	३	८	०		**संस्कृत.**			
२	श्रीमद्भगवद्गीता टीका वरदराजीय. ...	२	८	०					
३	हरिकथांमृतसार मूळ	१	०	०	१२	विजयध्वजी भागवत (जाडकागदावर)...	१६	०	०
४	व्यंकटेश पारिजात	०	१०	०	१३	देवी भागवत	१५	०	०
५	कृष्णपारिजात	०	८	०	१४	वाल्मिकी रामायण सटीक	१२	०	०
६	दासर पदगळु	०	८	०	१५	सचूर्णिक भागवत...	९	०	०
७	सत्यनारायण कथा	०	६	०	१६	हरिवंश सटीक (जाडकागदावर) ...	८	०	०
८	उत्तरादि मठद पिळगी	०	०	९	१७	श्री मन्महाभारत तात्पर्य निर्णय जना र्दनी टीकेसहीत	६	०	१
९	राघवेंद्र स्वामी मठद पिळगी. ...	०	०	९					
१०	व्यासराय स्वामी मठद पिळगी ...	०	०	९	१८	तत्वप्रकाशिका ब्रह्मसूत्र भाष्य	५	०	०
१९	मध्वविजय सटीक	५	०	०	३०	मध्वविजय मूळ	०	८	०
२०	स्मृत्यर्थ सागर	१	१२	०	३१	मूलार्यत श्लोक	०	८	०
२१	भागवत चंपू	१	८	०	३२	वायुस्तुती सटीक	०	८	०
२२	श्रीविष्णुरहस्य	१	८	०	३३	पंचामृत सूक्त स्वरयुक्त	०	७	०
२३	गरुडपुराण ब्रह्मकांड मूळ	१	८	०	३४	भगवद्गीता मूल (स्थूलाक्षर) ...	०	६	०
२४	श्रीब्रह्मकर्म (प्रातरारंभिसि सायमान्हि कवरिगु येनेनु स्तोत्र, मंत्र, स्वरस-मेतसूक्तगळु विषयानु रोधदिंदवेयो-आ ६० विषयगळु)	१	८	०	३५	द्वादशस्तोत्र सटीक...	०	६	०
					३६	सदाचार स्मृती सटकि	०	५	०
					३७	अणुमध्वविजय-सटीक	०	५	०
					३८	पद्यमाला सटीक	०	५	०
२५	सुंदरकांड रामायण मूळ	१	०	०	३९	आदित्यपुराणव्यंकटेशमा०मूल. ...	०	४	०
२६	माघमाहात्म्य (पद्मपुराण)	०	१०	०	४०	बृहज्जयतीर्थ विजय	०	३	०
२७	आदित्यपुराण व्यंकटेश माहात्म्य सटीक..	०	१०	०	४१	विष्णुस्तुती सटीक...	०	३	०
२८	मणिमंजरी सटीक (छलारी)	०	१२	०	४२	जितंतेस्तोत्र शतापराध करुणारस व्यासगद्य	०	३	०
२९	सरस भारती विलास... ...	०	८	०					

हरी भिकाजी सामंत,

बेळगांव समाचार छापखान्याचे मालक.

॥ इति श्रीजयतीर्थविजयं समाप्तं ॥